**22E**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – बहिःस्थ**

**परीक्षा : मे – २०२५**

**सत्र ५ वे**

**विषयः कादंबरी (22E454)**

| | | |
|---|---|---|
| **दिनांक :** १६/०५/२०२५ | **गुण :**१०० | **वेळ :** दु. २.०० ते ५.०० |

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र.१) चतुरः परिच्छेदान् माध्यमभाषया अनुवदत।** (४०)

१) रजोजुषे जन्मनि सत्त्ववृत्तये स्थितौ प्रजानां प्रलये तमःस्पृशे ।
अजाय सर्गस्थितिनाशहेतवे त्रयीमयाय त्रिगुणात्मने नमः ।।
जयन्ति बाणासुरमौलिलालिता दशास्यचूडामणिचक्रचुम्बिनः ।
सुरासुराधीशशिखान्तशायिनो भवच्छिदस्त्र्यम्बकपादपांसवः ।।
जयत्युपेन्द्रः स चकार दूरतो बिभित्सया यः क्षणलब्धलक्ष्यया।
दृशैव कोपारुणया रिपोरुरः स्वयं भयाद्भिन्नमिवास्रपाटलम्।।

२) एकतमस्तु जरच्छबरस्तस्मात्पुलिन्दवृन्दादनासादितहरिणपिशितः पिशिताशन इव विकृतदर्शनः पिशितार्थी तस्मिन्नेव तरुतले मुहूर्तमिव व्यलम्बत । अन्तरिते च शबरसेनापतौ स जीर्णशबरः पिबन्निवास्माकमायूंषि रुधिरबिन्दुपाटलया कपिलभ्रूलतापरिवेषभीषणया दृष्ट्या गणयन्निव शुककुलकुलायस्थानानि श्येन इव विहगामिषस्वादलालसः सुचिरमारुरुक्षुस्तं वनस्पतिमामूलादपश्यत् । उत्क्रान्तमिव तस्मिन्क्षणे तदालोकनभीतानां शुककुलानामसुभिः । किमिव हि दुष्करमकरुणानाम् ।

३) यस्मिंश्च राजनि जितजगति पालयति महीं चित्रकर्मसु वर्णसंकराः, रतेषु केशग्रहाः, काव्येषु दृढबन्धाः शास्त्रेषु चिन्ता, स्वप्नेषु विप्रलम्भाः छत्रेषु कनकदण्डाः ध्वजेषु प्रकम्पाः गीतेषु रागविलसितानि, करिषु मदविकाराः, चापेषु गुणच्छेदाः गवाक्षेषु जालमार्गाः शशिकृपाणकवचेषु कलङ्काः रतिकलहेषु दूतप्रेषणानि सार्यक्षेषु जालमार्गाः शशिकृपाणकवचेषु कलङ्काः, रतिकलहेषु दूतप्रेषणानि सार्यक्षेषु शून्यगृहाः, न प्रजानामासन्। यस्य च परलोकाद्भयम्, अन्तः पुरिकाकुन्तलेषु भङ्गः, नूपुरेषु मुखरता, विवाहेषु करग्रहणम् अनवरतमखाग्निधूमेनाश्रुपातः, तुरङ्गेषु कशाभिघातः मकरध्वजे चापध्वनिरभूत्।

४) अथ प्रतीहारी नरपतिकथनानन्तरमुत्थाय तां मातङ्गकुमारी प्रावेशयत्। प्रविश्य च सा नरपतिसहस्रमध्यवर्तिनमशनिभयपुञ्जिकुलशैलमध्यगतमिव कनकशिखरिणम् अनेक रत्नाभरणाकिरणजालकान्तारिताव्यवमिन्द्रायुधसहस्रसंछदिताष्टदिग्भागमिव जलधरदिवसम् उन्मयूखकान्तिविजयपराभवप्रणते शशिनीव स्फटिकपादपीठे विन्यस्तवामपादम्, अमलमणिकुट्टिमसंक्रान्तदेहप्रतिबिम्बतया पतिप्रेम्णा वसुन्धरया हृदयेनेवोयमानं राजानमद्राक्षीत् ।

५) नरपतिरब्रवीत्- 'आस्तां तावत्सर्वम् । अपनयतु नः कुतूहलम् । आवेदयतु भवानादितः प्रभृति कात्स्न्यैनात्मनो जन्म कस्मिन्देश, भवान्कथं जातः, केन वा नाम कृतम्, का ते माता, कस्ते' पिता, कथं वेदानामागमः, कथं शास्त्राणां परिचयः, कुतः कला सादिताः, किंहेतु'कं जन्मान्तरानुस्मरणम्,उत वरप्रदानम्, अथवा विह'ङ्गवेषधारी कश्चिच्छन्नं निवससि, क्व वा पूर्वमुषितम्, कियद्वा वयः, कथं पञ्जरबन्धनम्, कथं चाण्डालहस्तगमनम्, इह वा कथमागमनम् इति । वैशम्पायनस्तु स्वयमुपजातकुतूहलेन सबहुमानमवनिपतिना पृष्टटो मुहूर्तमिव ध्यात्वा सादरमब्रवीत्-'देव, महतीयं कथा ।

**प्र.२) चतस्रः टिप्पणीः माध्यमभाषया लिखत।** **(४०)**

१) बाणस्य लेखनशैली
२) पम्पासरोवरवर्णनम्
३) शाल्मलीवृक्षवर्णनम्
४) विन्ध्याटवीवर्णनम्
५) कुमारपालितस्य आक्षेपः

**प्र.३अ. दशानां सामासिकपदानां विग्रहं कृत्वा समासनाम लिखत।** **(१०)**

| | | | |
|---|---|---|---|
| १. रामलक्ष्मणौ | २. श्रोत्रहारी | ३. कलहंसकोलाहले | ४. कबन्धग्रस्तौ |
| ५. जन्मान्तरम् | ६. उपजातकुतूहलः | ७. मलयमेखला | ८. रूपसम्पन्ना |
| ९. हस्तस्थितः | १०. पम्पासरः | ११. सशेषम् | १२. वनचरः |

**आ. दशानां रूपाणां परिचयं कारयत।** **(१०)**

| | | | |
|---|---|---|---|
| १. अकरोत् | २. जराम् | ३. समाहृत्य | ४. तस्य |
| ५. वेधसा | ६. पूरितम् | ७. दिशः | ८. जहार |
| ९. आवेदयतु | १०. शास्त्राणाम् | ११. ते | १२. देवीभिः |

----------